## अध्याय :- ४१ chapter-41

करंधम उवाच ।।
केचिच्छिवं समाश्रित्य[१] विष्णुमाश्रित्य वेधसम् ।।
वर्णयंति[२] परे मोक्षं त्वं तु कस्मात् मन्यसे ।। १

महाकाल उवाच[३] ।।
अपार वैभवा देवास्त्रयोऽप्येते नरर्षभ ।।
योगींद्राणामपि त्वत्र चेतो मुह्यति किं मम ।। २

पुरा किलैवं मुनयो नैमिषारण्यवासिनः ।।
संदिह्यांतः श्रेष्ठतायां ब्रह्मलोकमुपागमन् ।। ३

तस्मिन्क्षणे विरिंचोऽपि श्लोकं प्रह्वोऽब्रवीत्किल ।।
अनंताय नमस्तस्मै यस्यांतो नोपलभ्यते ।। ४

महेशाय च भक्ते द्वौ कृपायेत्तां सदामयि ।।
ततः श्रेष्ठं[४] च तं मत्वा क्षीरोद्रं मुनयो ययुः ।। ५

तत्र योगीश्वरः श्लोकं प्रबुध्यन्नमुम ब्रवीत् ।।
ब्रह्माणं सर्वभूतेषु परमं ब्रह्मरूपिणम् ।। ६

सदाशिवं च वंदे तौ भवेतां मंगलाय मे ।।
ततस्ते विस्मिता विप्रा अपसृत्य ययुः पुनः ।। ७

---

१ ब. प्रतौ 'प्रशंसति' इति स्यात् ।
२ ब. वर्णयंत्य
३ अ. 'उवाच' नास्ति ।
४ ब. श्रेष्ठौ

कैलासे ददृशुः स्थाणुं वदंतं[१] गिरिजां प्रति ।।
एकादश्यां प्रनृत्यानि जागरे विष्णुसद्मनि ।। ८

सदा तपस्यां चरामि प्रीत्यर्थं हरिवेधसोः ।।
श्रुत्वेति चापसृत्यैव खिन्नास्ते मुनयो ब्रुवन् ।। ९

[२]यद्वा देवा न संयाति पारं ये च परस्परम् ।।
तत्सृष्ट सृष्टेषु[३] गरिम्णा काऽस्मदादिषु ।। १०

उत्तमाधममध्यत्वमीर्ष्या वर्णयंति ये ।।
असत्यवादिनः पापास्ते यांति निरयं ध्रुवम् ।। ११

एवं ते निश्चयामासु नैमिषेयास्तपस्विनः ।।
सत्यमेतच्च राजेन्द्र ममापीदं मतं स्फुटम् ।। १२

जापकानां सहस्त्राणि वैष्णवानां तथैव च ।।
शैवानां च विधिं विष्णुं स्थाणुं चाप्यन्वमूमुचन् ।। १३

तस्माद्यस्य मनोरागो यस्मिन्देवे भवेत्स्फुटम् ।।
स तं[४] भजेद्विपापः स्यान्ममेदं मतमुत्तमम् ।। १४

---

१ अ. वदंति
२ ब. यदा वेदान...
३ अ. सृष्टिषु
४ अ. ते

करंधम उवाच ।।

कानि पापानि विप्रेंद्र यैस्तु संमूढचेतसः ।।
नवेदेषु[1] न धर्मेषु रतिमापद्यते मनः ।। १५

महाकाल उवाच[2] ।।

अधर्मभेदा विज्ञेयाश्चितवृत्ति प्रभेदतः ।।
स्थूलाः सूक्ष्माः असूक्ष्माश्च कोटिभेदैरनेकशः ।। १६

तत्र ये पापनिचयाः स्थूला नरकहेतवः ।।
ते समासेन कथ्यंते मनोवाक्काय साधनाः ।। १७

परस्त्रीद्रव्यसंकल्पश्चेतसानिष्ट चिंतनम् ।।
अकार्याभिनिवेशश्च चतुर्धा कर्म मानसम् ।। १८

अनिबद्धपलापित्वमसत्यं चाप्रियं च यत् ।।
[3]परापवाद पैशुन्यं चतुर्धा कर्म वाचिकम् ।। १९

अभक्ष्यभक्षणं हिंसा मिथ्या कामस्य सेवनम् ।।
परस्वानामुपादानंञ्च चतुर्धा कर्म कापिकम् ।। २०

इत्येतद्द्वादशविधं कर्म प्रोक्तं त्रिसंभवम् ।।
अस्य भेदान्पुनर्वक्ष्ये येषां फलमनंतकम् ।। २१

---

१ अ. देवेषु

२ अ. ब. 'उवाच' नास्ति ।

३ परापवाद.....वाचिकम् ।। अ. प्रतौ त्रुटितं ।

*१ये द्विषंति महादेवं संसारार्णवतारकम् ।।
सुमहत्पात कोपेतास्ते यांति नरकाग्निषु ।। २२

महांति पातकान्याहुर्निरंतर फलानि षट् ।।
नाभिनंदंति ये दृष्ट्वा शंकरं न स्तुवंति ये ।। २३

यथेष्टचेष्टा निःशंकाः संतिष्ठंति रमंति च ।।
उपचार विनिर्मुक्ताः शिवस्य गुरु संनिधौ ।। २४

शिवाचारं न मन्यंते शिवभक्तान्द्विषंति षट् ।।
*२गुरु मार्त्तमशक्तं वा विदेश प्रस्थितं तथा ।। २५

अरिभिः परिभूतं वा यस्त्यजति स पापकृत् ।।
तद्भार्या पुत्रमित्रेषु यश्चावज्ञां करोति वा ।। २६

इत्येतत्पातकं ज्ञेयं गुरु निंदासमं महत् ।।
ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरु तल्पगः ।। २७

महापात किनस्त्वेते तत्संसर्गी च पंचमः ।।
क्रोधाद्द्वेषाद्भयाल्लोभाद्ब्राह्मणस्य वंदति ये ।। २८

---

*१ 'ये.........तारकम्' ।। अ. प्रतौ इत्ययं पाठः नास्ति ।
*२ 'गुरु मा..... तथा' ।। ब. प्रतौ इत्ययं पाठः नास्ति

मर्मांतिकं महादोषं ब्रह्मघ्नः स प्रकीर्तितः ।।
ब्राह्मणं यः समाहूय याचमानम किंचनम् ।। २९

प्रश्चान्नास्तीति यो ब्रूयात्स च वै ब्रह्महा स्मृतः ।।
यश्च विद्याभिमानेन निस्तेजयति सद्द्विजम् ।। ३०

उदासीनः सभामध्ये ब्रह्महा स प्रकीर्तितः ।।
मिथ्यागुणैः स्वमात्मानं नयत्युत्कर्षतां बलात् ।। ३१

विरुद्धं गुरुभिः सार्धं ब्रह्मघ्नः स प्रकीर्तितः ।।
क्षुत्तृष्णातप्त देहानां द्विजानां भोक्तुमिच्छताम् ।। ३२

यः समाचरते विघ्नं तमाहुर्ब्रह्म धातकम् ।।
पिशुनः सर्वलोकानां छिद्रान्वेषणतत्परः ।। ३३

उद्वेगजननः क्रूरः स च वै ब्रह्महा स्मृतः[१] ।।
गवां तृषाभिभूतानां जलार्थमुप सर्पताम् ।। ३४

यः समाचरते विघ्नं तमाहुर्ब्रह्मघातकम् ।।
परदोषं परिज्ञाय नृपकर्णे जपेत यः ।। ३५

---

१ ब. स्मृतं

*[1]पापीयान्पिशुनः क्रूरस्तमाहुर्ब्रह्म धातकम् ।।
न्यायेनोपार्जितं विप्रैस्तद्द्रव्यहरणं च यत् ।। ३६

*[2]छद्मना वा बलाद्वापि ब्रह्महत्यासमं मतम् ।।
अधीत्य यश्च शास्त्राणि परित्यजति मूढधीः ।। ३७

सुरापानसमं ज्ञेयं [3]जीवनायैव वा पठेत् ।।
अग्निहोत्र परित्यागः पंचयज्ञोप कर्मणाम् ।। ३८

मातृपितृ परित्यागः कूटसाक्षी सुहृद्वधः ।।
[4]अभक्ष्य भक्षणं वन्यजंतूनां काम्यया वधः ।। ३९

ग्रामं[5] वनं गवावासं यश्च क्रोधेन दीपयेत् ।।
इति घोराणि पापानि सुरापान समानि च ।। ४०

दीनसर्वस्व हरणं नरस्त्रीगजवाजिनाम् ।।
गोभूरत्न सुवर्णा नामौषधीनां रसस्य च ।। ४१

चंदनागरु कर्पूर कस्तूरी पट्वाससाम् ।।
हस्तन्यासाप हरणं रुक्मस्तेय समं स्मृतम् ।। ४२

---

*१ 'पापी..... धातकम्' ।। अ. प्रतौ त्रुटितं ।
*२ छद्मना.....मतम् ।। अ. प्रतौ त्रुटितं ।
३ 'जीवनायैव वा पठेत्' इदमर्धं अ. पुस्तके लुप्तम्
४ ब. अभक्षभक्षणं
५ अ. ग्रासं

कन्यानां वरयोगृयानामदानं सदृशे वरे[१] ॥
पुत्रमित्र कलत्रेषु गमनं भगिनीषु च ॥ ४३

कुमारी साहसं घोरमंत्यजस्त्रीनिषेवणम् ॥
सवर्णायांश्च गमनं गुरुतल्पसमं स्मृतम् ॥ ४४

द्विजायार्थं प्रतिश्रुत्य न प्रयच्छति यः पुनः ॥
न च स्मारयते विप्रं[२] तुल्यं तदुपपातकम्[३] ॥ ४५

अभिमानोति[४] कौपश्च [५]दांभिकत्वं कृतघ्नता ॥
अत्यंत विषयासक्तिः कार्पण्यं ~~कुलभुत्तव~~ ++ शाठयमत्सरम् ॥ ४६

भृत्यानां च परित्यागः साधुबंधुतपस्विनाम् ॥
गवां क्षत्रिय वैश्यानां स्त्री शूद्राणां च ताडनम् ॥ ४७

शिवाश्रम तरुणां च पुष्पाराम विनाशनम् ॥
अयाज्यानां याजनं चाप्ययाच्यानां च याचनम् ॥ ४८

यज्ञारामतडागादि दारापत्यस्य विक्रयः ॥
तीर्थयात्रोपवासानां व्रतायतन कर्मणाम् ॥ ४९

---

१ ब. 'वारयोगृया....'
२ ब. विप्र
३ अ. तदुपधात्तकं
४ ब. अतिमानिति
५ अ. दंभि.....

स्त्रीधनान्युपजीवंति स्त्रीभिरत्यंत निर्जिताः ।।
अरक्षणं च नारीणां मद्यपस्त्रीनिषेवणम् ।। ५०

ऋणानाम प्रदानं च मिथ्याबृद्धयुपजीवनम् ।।
निंदितानां धनादानं साध्वी कन्यापेक्ति दूषणम् ।। ५१

विषमारणयंत्राणां प्रयोगो मूल कर्मणाम् ।।
उच्चाटनाभिचाराश्च रागविद्वेषण क्रिया ।। ५२

जिह्वाकामोपभोगार्थं यस्यारंभः स्वकर्मसु ।।
मूल्येनाध्यापयेद्यस्तु मूल्येनाधीयते च ये[१] ।। ५३

व्रात्यता व्रतसंत्यागः सर्वाहार निषेवणम् ।।
[२]असच्छास्त्राभिगमनं शुष्कतर्कावलंबनम् ।। ५४

देवाग्नि गुरुसाधूनां निंदा गोब्राह्मणस्य च ।।
प्रत्यक्षं वा परोक्षं वा राज्ञां मंडलिनामपि ।। ५५

उत्सन्नपितृदेवेज्याः स्वकर्मत्यागिनश्च ये ।।
दुःशीला नास्तिकाः[३] पापा न सदा सत्यवादिनः ।। ५६

---

१ अ, ब, 'यः'
२ 'असच्छास्त्राभिगमनं' इदमर्ध अ प्रतौ लुप्तम् ।।
३ ब. नास्तिका

पर्वकाले दिवा चाप्सु वियोनौ पशुयोनिषु ।।
रजस्वलास्वयोनौ च मैथुनं यः समाचरेत् ।। ५७

[1]स्त्रीपुत्रमित्रसुत्ददामाशाच्छेद कराश्च ये ।।
जनस्याप्रियवक्तारः क्रूराः समय भेदिनः ।। ५८

भेत्ता तडागकूपानां संक्रमाणां रसस्य च ।।
एकपंक्ति स्थितानां च पाकभेदं करोति यः ।। ५९

इत्येतैश्च नराः पापैरुपपातकिनः स्मृताः[2] ।।
युक्तास्तदूनकैः पापैः पापिनस्तान्निबोध मे ।। ६०

ये गोब्राह्मण कन्यानां स्वामिमित्र तपस्विनाम् ।।
अन्तरं यांति कार्येषु ते स्मृताः पापिना नराः ।। ६१

परश्रियाभितप्यंते हीनां सेवंति ये स्त्रियाम् ।।
पंक्तयर्थं ये न कुर्वंति श्च दानयज्ञादिकाः क्रियाः।। ६२

गोष्ठाग्निजलथ्यासु तरुच्छायानगेषु च ।।
त्यजंति ये पुरीषाद्यमारामाय तनेषु च ।। ६३

---

१ अ. 'स्त्री.....छेदं' पर्यन्तं त्रुटितम्
२ ब. स्मृतः

गीतवाद्यरता नित्या मत्ताः किल किलापराः ।।
कूटवेष क्रियाचाराः कूटसंव्य वहारिणः ।। ६४

कूटशासन कर्तारः कूटयुद्ध कराश्च ये ।।
निर्दयोऽतीव भृत्येषु पशूनां दमनश्च यः ।। ६५

मिथ्याप्रसादितो[1] वाक्यमाकर्णयति यः शनैः ।।
चपलश्चापि मायावी शठो मिथ्याविनीतकः ।। ६६

यो भार्यापुत्रमित्राणि बालवृद्ध कृशातुरान् ।।
भृत्यानतिथि बंधूश्च त्यक्त्वाश्नाति बुभुक्षितान् ।। ६७

यः स्वयं मृष्टमश्नाति विप्रायान्यत्प्रयच्छति ।।
वृथापाकः स विज्ञेयो ब्रह्मवादि विगर्हितः ।। ६८

नियमान्स्वयमादाय ये त्यजंत्य जितेंद्रियाः[2] ।।
ये ताडयंति गां नित्यं वाहयंति मुहुर्मुहुः ।। ६९

दुर्बलान्नैव पुष्यंति प्रणष्टार्था द्विषंति च ।।
पीडयन्त्य भिकारेण सक्षतान्वाहयंति च ।। ७०

---

१ 'प्रमादतो' अ. ब. पाठः ।
२ ब. जितेंद्रियः

तेषा मदत्वा चाश्नंति चिकित्संति न रोगिणः[1] ।।
अजाविको माहिष्किकः समुद्री वृषलीपतिः ।। ७१

हीनवर्णात्मवृत्तिश्च वैद्यो धर्मध्वजी [2]च यः ।।
यश्च शास्त्रमतिक्रम्य [3]स्वेच्छया वाहरेत्करम् ।। ७२

सदा दण्डरुचिर्यश्च यो वा दण्डरुचिर्न हि ।।
उत्कोचकैरधिकृतै स्तस्करैश्च प्रपीडयते ।। ७३

[4]यस्य राज्ञः प्रजा राष्ट्रे पच्यते नरकेषु सः ।।
अचौरं चौरवत्पश्येच्चौरं वा चौररूपिणम् ।। ७४

आलस्यो पहतो [5]राजा व्यसनी नरकं व्रजेत् ।।
एवमादीनि चान्यानि पापान्याहुः पुराविदः ।। ७५

यद्वातद्वा परद्रव्यमपि सर्षपमात्रकम् ।।
अपत्दत्य नरः पापो नारकी नात्र संशयः ।। ७६

एवमाद्यैर्नरः पापैरुत्क्रान्तैः[6] समनंतरम् ।।
शरीरं यातनार्थाय पूर्वाकारमवाप्नुयात् ।। ७७

---

१ अ. रोगिनः

२ ब. तयः

३ अ. 'स्वेच्छया वाहरेत्कम्' त्रुटितम्

४ 'यस्य..... राष्ट्रे' ।। अ. प्रतौ श्लोकार्ध नास्ति ।

५ 'राजा.....वज्रेत' ।। अ. प्रतौ श्लोकार्ध नष्ट ।

६ ब. 'कान्ते'

तस्मात्त्रिविधमप्येतन्नारकीयं विवर्जयेत् ।।
सदाशीवं च शरणं व्रजेत्सच्छ्रद्धया युतः ।। ७८

नमस्कारः[१] स्तुतिः पूजा नाम संकीर्तनं तथा ।।
संपर्कात्कौ तुकाल्लोभान्न तस्य विफलं भवेत् ।।*२ ७९

करंधम[३] उवाच ।।
संक्षेपाच्छिवपूजाया विधानं वक्तुमर्हसि ।।
कृतेन येन मनुजः शिवपूजाफलं लभेत् ।। ८०

महाकाल[४] उववच ।।
प्रातर्मध्याह्न सायाह्ने शंकरं सर्वदा भजेत् ।।
दर्शनात्स्पर्शनान्मर्त्यः कृतकृत्यो भवेत्स्फुटम् ।। ८१

आदौ स्नानं प्रकुर्वीत भस्मस्नानमथापि वा ।।
आपद्गतः कण्ठस्नानं मन्त्रस्त्रानमथापि वा ।। ८२

आविकं परिदध्याच्च ततो वासः सितं च वा ।।
धातुरक्तमथो नव्यं मलिनं संधितं न च ।। ८३

उत्तरीयं च संदध्याद्विना तन्निष्फलार्चनम् ।।
भस्मत्रिपूण्डधारी च ललाटे त्वदि चांसयोः ।। ८४

---

१ ब. नमस्कार

*२ ब. इति श्री स्कंद पुराणे कुमारिकाखंडे पापानां वग उत्पत्ति स्थानकं चत्वारिंशत्तोध्यायः ।।
मुद्रित पुस्तके अध्याय साततयम् ।
Again in the M S S-B, 40<u>th</u> chapter is mentioned here.

३ अ. प्रती 'उवाच' नास्ति । ४ अ. प्रतौ 'उवाच' नास्ति ।

पूजयेद्यो महादेवं प्रीतः पश्यति तं मुहुः ।।
सर्व दोषान्बहिः क्षिप्य शिवायतनमाविशेत् ।। ८५

प्रविश्य च प्रणम्येशं ततोगर्भगृहं विशेत् ।।
पाणी प्रक्षाल्य तच्चितो निर्माल्यमवरोपयेत् ।। ८६

[1]येन रुदायने भक्त्या कुरुते मार्जन क्रियाम् ।।
तस्मान्मार्जयते त्वेवं स्थाणुनैतत्परस्परम् ।। ८७

रुद्रभक्त्या च संतिष्ठेन्मालिन्यं मार्जयेततः ।।
भक्ति दैवस्य तिष्ठेन्न मालिन्यं मार्जतः सदा ।। ८८

गडुकान्पूरयेत्पश्चान्निर्मलेन जलेन वै ।।
गडुकास्तु समाः सर्वे सर्वे च शुभदर्शनाः ।। ८९

निर्व्रणाः सौम्यरूपाश्च सर्वे चोदकपूरिताः ।।
वस्त्र पूतजलैः पूर्णा गन्धधूपैश्च वासिताः ।। ९०

क्षालिताः पूरिता नीताः[2] षडक्षरजपेन च ।।
गडुकाष्टशतं कुर्यादथवाप्यष्ट विंशतिः[3] ।। ९१

---

१ 'ये रुद्राय तने' अ. ब. पाठः ।
२ ब. नीतः
३ अ. विंशतिं

अष्टादशापि चतुरस्ततो न्यूनं न कारयेत् ।।
[1]पयो दधि घृतं चैव क्षौद्रमिक्षुरसं तथा ।। ९२

एवं सर्वं च तद्द्रव्यं वामतः संन्यसेद्भवात् ।।
ततो बहिर्विनिष्क्रम्य पूजयेत्प्रतिहार कान् ।। ९३

सर्वेषां वाचकामन्त्राः कथ्यंते तः परंक्रमात् ।। ९४

ॐ गां गणपतये नमः ।। [2]ॐ क्षेत्रपालाय नमः ।।
[3]ॐ महाकालाय नमः ।। ॐ धात्रे विधात्रे नमः ।।
ततः प्रविश्य लिंगाच्च किंचिद्दक्षिणतः शुचिः ।। ९५

दर्भादिभिः परिवृतं मध्यपद्मा कमंडलम् ।।
सामे मण्डल मध्यस्थं ध्यायेद्वि वह्निमंडलम् ।। ९६

तन्मध्ये विष्णुवरूपं च[4] वामाद्यष्टादिशक्तिकम् ।।
पंचवक्त्रं दशभुजं त्रिनेत्रं चंद्रभूषितम् ।। ९७

ततः पूर्वं प्रदद्याच्च पाद्यार्घं शंभवे नृप ।। ९८

---

१ 'पयो......चैव' इदमर्धं अ. पुस्तके लुप्तम् ।
२ ॐ......नमः अ. प्रतौ नास्ति ।
३ ॐ महाकालाय नमः । अ. प्रतौ त्रुटितम्
४ अ. 'तं' पाठः ।

पानीयमक्षता[1] दर्भा गंधपुष्पं ससर्पिषम्[2] ।।
क्षीरं दधि मधु पुनर्नवांगोऽर्धः प्रकीर्तितः ।। ९९

ततः श्रद्धार्द्रचित्तस्य स्नानं लिंगस्य चाचरेत् ।।
गृहीत्वा गडुकं पूर्वं मलस्नानं समाचरेत् ।। १००

अर्द्धेन स्नापयेत्पूर्वं कुर्याच्च मलघर्षणम् ।।
सर्वेण स्नापयेत्पश्चात्पूजयेत्स्नापयेत्ततः ।। १०१

प्रणम्य च ततो भक्त्या स्नापयेन्मूलमंत्रतः ।।
ॐ हूं विश्वमूर्तये शिवाय नमः ।।
इति द्वादशाक्षरो मूलमंत्रः ।। १०२

वारिक्षीरदधि क्षौद्र घृतेन क्षुरसेन च ।।
स्नापयेन्मुलमंत्रेण जलधूपार्चनात्पृथक् ।। १०३

गडुकैः स्नापयेत्सर्वैः स्नातं[3] गन्धैर्विरूक्षयेत् ।। १०४

पूजयेद्विविधैः पुष्पैर्विधिना येन तच्छृणु ।। १०५

---

१ अ. यमक्षिता
२ ब. ससर्प्याः
३ अ. स्नातो

आग्नेयपादे ।। [1]

ॐ धर्माय नमः ।। ॐ ज्ञानाय नमः ।।
ॐ अनन्ताय नमः ।। ॐ पद्माय नमः ।।
[2] ॐ परम प्रकृत्यै देव्यै नमः ।।
[3] ॐ हूं विश्वमूर्तये शिवाय नमः ।। १०६

[3]ततो जलाधारमुखे चण्डीश्वराय नमः ।।
एवं संपूज्य विधिवत्ततोऽर्घं संनिवेशयेत् ।। १०७

पानीयमक्षताः पुष्पमैतैयुक्तं फलोत्तमैः ।।
गृहाणार्घ्यं महादेव पूजासंपूर्ति हेतवे ।। १०८

अर्घादनंतरं शक्तः पूजयेद्वसु पूजया ।।
धूपं दीपं च नैवेद्यं क्रमात्पश्चान्निवेदयेत् ।। १०९

घण्टां च वादयेत्तत्र ततो नीराजनं चरेत् ।। ११०

निराजनं च यः पश्ये देवदेवस्य शूलिनः ।।
स मुच्येत्पातकैः सर्वैः किं पुनर्यः करिष्यति ।। १११

नृत्यं गीतं च वाद्यं च अलीकमपि यश्चरेत् ।।
तस्य तुष्येदनंतहि गीतवाद्यफलं यतः ।। ११२

---

१ अ. ब. आग्नेय पादे ।।
२ ॐ परम.......नमः ।। अ. प्रतौ इत्ययं पाठः नास्ति ।
३ ब. ॐ नमः ततो.....अत आरंभ्यैते

स्तोत्रैस्ततश्चैव संस्तूय दण्डवत्प्रणमेद् भुवि ।।
क्षमापयेच्च देवेशं सुकृतं कुकृतं क्षम ।। ११३

य[1] एवं[2] यजते रुद्रमस्मिंल्लिंगे विशेषतः ।।
पितरं पितामहं चैव चथैव प्रपितामहम् ।। ११४

सर्वात्पापात्समुत्तार्य रुद्रलोके वसेच्चिरम् ।।
एवं माहेश्वरो भूत्वा सदाचारव्रत स्थितः ।। ११५

पशुपाश विमोक्षार्थं पूजयेत्तन्मना यदि ।।
य एवं यजते रुद्रं तेनैतत्तर्पितं जगत् ।। ११६

किं त्वेतत्सफलं राजन्नाचार यो न लंघयेत् ।।
आचारत्फलते धर्मो ह्याचारात्स्वर्गमश्नुते ।। ११७

आचारल्लभते ह्यायुराचारो हंत्यलक्षणम् ।।
यज्ञदान तपांसीह पुरुषस्य न भूतये ।। ११८

भवन्ति यः सदाचारं[3] समल्लंघ्य प्रवर्तते ।।
तस्य किंचित्समुद्देशं वक्ष्ये तं श्रृणु पार्थिव ।। ११९

---

१ 'ये' ब. पाठः ।
२ एन अ. ब. पाठः
३ ब. सदाचारः ।

त्रिवर्गसाधने यत्नः कर्तव्यो गृहमेधिना ।।
तत्संसिद्धौ गृहस्थस्य सिद्धिरत्र परत्र च ।। १२०

ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चापि चिन्तयेत् ।।
समुत्थाय तथाचम्य दंतधावन पूर्वकम् ।। १२१

सन्ध्यामुपासीत बुधः संशांतः[१] प्रयतः शुचिः[२] ।।
पूर्वा सन्ध्यां सनक्षत्रां पश्चिमां सदिवाकराम् ।। १२२

उपासीत यथान्यायं नैनां जह्यादनापदि ।।
[३]वर्जयेदनृतं चासत्प्रलापं परुषं तथा ।। १२३

असत्सेवां ह्यसद्वादं ह्यसच्छास्त्रं च पार्थिव ।।
आदर्श दर्शनं दंतधावनं केश साधनम् ।। १२४

देवार्चनं च पूर्वाह्णे कार्याण्याहुर्महर्षयः ।।
पालाशमासनं चैव पादुके दंतधावनम् ।।
[४]वर्जयेदासनं चैव पदा नाकर्षयेद्बुधः ।। १२५

जलमग्निं च निनयेद्युपन्न विचक्षणः ।। १२६

---

१ 'सुशांतः' अ. ब. पाठः ।
२ अ. प्रतौ लुप्तम्
३ 'वर्जयेद.....प्रलापं' इदमर्ध अ. पुस्तके लुप्तम् ।
४ 'वर्जये......चैव' अ. प्रतौ श्लोकार्धं नास्ति ।

[1]पादौ प्रसारयेन्नैव गुरुदेवाग्नि संमुखौ ।।
चतुष्पथं चैत्यतरुं देवागारं तथा यतिम् ।। १२७

विद्याधिकं गुरुं[2] वृद्धं[3] कुर्यादितान्प्रदिक्षिणान् ।। १२८

आहार नीहार विहार भोगाः सुसंवृता धर्मविदानुकार्याः ।।
वाग्बुद्धि वीर्याणि तपस्तथैव वार्तायुषी गुप्ततमे च कार्ये ।। १२९

उभे मूत्रपुरीषे तु दिवा कुर्यादुदंमुखः ।।
दक्षिणाभिमुखो रात्रौ ह्येवमायुर्न रिष्यते ।। १३०

प्रत्यग्निं प्रति सूर्यं च प्रति गां ~~कुलेन~~ व्रतिनं प्रति ।।
प्रति सोमोदकं संध्यां प्रज्ञा नश्यति मेहतः ।। १३१

भोजने शयने[4] स्थाने उत्सर्गे मलमूत्रयोः ।।
रथ्याचं क्रमाणे चार्द्रपंचकश्चाचमेत्सदा ।। १३२

न नद्यां मेहनं कूर्यान्न श्मशाने न भस्मनि ।।
न गोमये न कृष्टे च नैवालूने[5] न शाड्वले ।। १३३

---

१ 'पादौ.......नैव' इदमर्ध अ. पुस्तके लुप्तम् ।।
२ ब. गुरुं
३ ब. वृद्धिं
४ ब. शयन
५ ब. नेवास्ते

उद्धृताभिस्तथाद्भिस्तु शौचं कुर्याद्विचक्षणः ।।
अंतर्जलादेव कुलाद्वल्मीकान्मूषक स्थलात् ।। १३४

अपविद्धापशौचाश्च वर्जयेत्पंच मृत्तिकाः ।।
गन्धलेपापहरणं शौचं कुर्यात्तथा बुधः ।। १३५

नात्मानं ताडयेन्नैव दद्याद्दुःखेभ्य एव च ।।
उभाभ्यामपि पाणिभ्यां कण्डूयेन्नात्मनः शिरः ।। १३६

रक्षेद्दारांस्त्य जेदीर्ष्यां तासु निष्कारणं बुधः ।।
सूर्यास्तं न[१] विना कांश्चित्क्रिया नैवाचरेत्तथा ।। १३७

अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः ।।
शिवचित्तोर्जयेद्वित्तं न चातिकृपणो भवेत् ।। १३८

नेर्ष्युः स्यान्न कृतघ्नः स्यान्न परद्रोहकर्मधीः ।।
न पाणिपादचपलो न नेत्रचपलो नृजुः ।। १३९

न च वागङ्गचपलो न चाशिष्टस्य गोचरः ।।
न शुष्क वादं कुर्वीत [२]शुष्कवैरं तथैव च ।। १४०

---

१ ब. च पाठः ।
२ 'शुष्कवैरं तथैव च' इदमर्ध अ. पुस्तके लुप्तम् ।

उपायैः साधयेदर्थान्दण्डस्त्वगतिका गतिः ।।
भिन्नाशनं भिन्नशय्यां वर्जद्भिन्न भाजनम् ।। १४१

अंतरेण न गच्छेत द्वयोर्ज्वलन लिंगयोः ।।
नाग्न्योर्न विप्रयोश्चैव न दंपत्योर्नृपोत्तम्[1] ।। १४२

न सूर्यव्योमयोर्नैव हरस्य वृषभस्य च ।।
एतेषामंतरं कुर्वन्यतः पापमवाप्नुयात् ।। १४३

नैकवस्त्रश्च भुंजीत नाग्नौ[2] होममथा चरेत् ।।
न चार्चये द्विजान्नैव कुर्यादिवार्चनं बुधः ।। १४४

खंडनं पेषणं[3] मार्ष्टि जलसंशोधनं[4] तथा ।।
रंधनं भोजनं स्वाप उत्थानं गमनं क्षुतम् ।। १४५

कार्यारंभं समाप्तिं च वचःप्रोच्य तथा प्रियम् ।।
पिबन्जघ्रन्स्पृशन्छृण्वन्वि वक्षुर्मैथुनं तथा ।। १४६

शुचित्वं च जपं स्थाणुं यः कुर्याद्विंशंतिं तथा ।।
माहेश्वरः स विज्ञेयः [5]शेषान्यो नाम धारकः ।। १४७

---

१ ब. पैत्तृतमः
२ ब. नग्नौ
३ अ. पीषणं । ब. पिषणं ।
४ ब. संशोषणं
५ 'शेषान्योनामधारकः' इदमर्ध अ. पुस्तके लुप्तम् ।

स चै रुद्रमयो भूत्वा ततश्चान्ते शिवं व्रजेत् ।।
परस्त्रियं नाभिभाषेत्तथा संभाषयेद्यदि ।। १४८

मातः स्वसरथो पुत्रि आर्येति च वदेद्बुधः ।।
उच्छिष्टो नालभेत्किंचिन्न च सूर्यं विलोकयेत् ।। १४९

नेन्दुं न तारकाश्चैव नादयेन्नात्मनः शिरः ।।
स्वस्त्रा दुहित्रा मात्रा वा नैकांतासनमाचरेत् ।। १५०

दुर्जयो ह्यींद्रियग्रामो मुह्यते पंडितोऽपि सन् ।।
गुरुमभ्यागतं गेहे स्वयमुत्थाय यत्नतः ।। १५१

आसनं कल्पयेत्तस्य कुर्यात्पादाभि वंदनम् ।।
नोदकिछराः स्वपेज्जातु न च प्रत्यकिछरा बुधः ।। १५२

शिरस्यगस्त्यमाधाय तथैव च पुरंदरम् ।।
उदक्यादर्शनं स्पर्शं वर्ज्यं संभाषणं तथा[१] ।। १५३

नाप्सु मूत्रं पुरीषं वा मैथुनं वा समाचरेत् ।।
कृत्वा विभवतो[२] देवमनुष्यर्षि समर्चनाम् ।। १५४

---

१ ब. यदा

२ 'देव........नाम्' इदमर्ध अ. पुस्तके लुप्तम् ।

पितृणां च ततः शेषं भोक्तुं महेश्वरोऽर्हति ।।
वाग्यतः शुचिरा चांतः प्राङ्मुखाद्दङ् मुखोऽपिवा ।। १५५

अन्तर्जानुश्च वञ्चितो भुंजीतान्नमकुत्सयन् ।।
नोपघातं विना दोषान्न तस्योदाहरेबुधः ।। १५६

नग्नस्नानं न कुर्वीत न शयीत व्रजेत वा ।।
दुष्करं न गुरोर्ब्रूयात्क्रुद्धं चैनं प्रसादयेत् ।। १५७

परिवादं न श्रृणुयादन्येषामपि जल्पताम् ।।
सदा चाकर्णयेद्धर्मास्त्यक्त्वा कृत्यशतान्यपि ।। १५८

[1]नित्यं नित्यं हि संमार्ष्टि गेहदर्पणयोरिव ।।
शुक्लायां च चतुर्दश्यां नक्तभोजी सदा भवेत् ।। १५९

[2]तिस्त्रो रात्रीर्न शक्तश्च देवं माहेश्वरो भवेत् ।।
संयावकृशरामांसं नात्मानमुपसाधयेत् ।। १६०

सायंप्रातश्च भोक्तव्यं कृत्वा ह्यतिथि भोजनम् ।।
स्वप्नाध्ययन भोज्यानि संध्ययोश्च विवर्जयेत् ।। १६१

---

१ 'नित्यं नित्यं हि' अ. पुस्तके लुप्तम् ।
२ 'तिस्त्रो......देवं' अ. पुस्तके लुप्तम् ।।

भुंजानः संध्ययोर्मोदाह सुरावसथो भवेत् ।।
स्नातो न धूनयेत्केशान्क्षुते निष्ठीविते/ध्वनि ।। १६२

आलभेदक्षिणं कर्णं सर्वभूतानि क्षामयेत्[१]।।
न चापि नीलीवासाः[२] स्यान्न विपर्यस्तवस्त्रधृक[३] ।। १६३

वर्ज्यं च मलिनं वस्त्रं दशाभिश्च विवर्जितम् ।।
प्रक्षाल्य मुखहस्तौ[४] च पादौ चाप्युपविश्य च ।। १६४

अंतर्जानुस्त्रिराचामे द्विर्मुखं परिमार्जयेत् ।।
तोयेन स्पर्शयेत्खानि स्वमूर्धानं तथैव च ।। १६५

आचम्य पुनराचम्य क्रियाः कुर्वीत सर्वशः ।।
क्षुते निष्ठीविते चैव दंतलग्ने तथैव च ।। १६६

पतितानां च संभाषे कुर्यादाचमन क्रियाम् ।।
अध्येतव्या त्रयी नित्यं भवितव्यं विपश्चिता ।। १६७

---

१ ब. क्षमयेत्

२ ब. नीलवासां

३ ब. भृत

४ अ. 'मुखहस्तौ' नास्ति ।

धर्मं तो धनमाहार्यं यष्टव्यं चापि ~~अन्नत~~ यत्नतः ।।
हीनेभ्योपि[1] न युंजीत[2] त्वकारं कर्हिचिद्बुधः ।। १६८

सत्यं वाच्यं नित्यमैत्रेण भाव्यंकार्यं नित्यमायासकारि ।।
लोकेऽमुष्मिन्यदिनं स्यात्तथास्मिन्नात्मा योगे योजनीयो गभीरेः ।। १६९

तीर्थस्नानैः सोपवासैर्व्रतैश्च पात्रे दानैर्होमजप्यैश्च यज्ञैः ।।
भवार्चनैर्देव पूजाविशेषैरात्मा नित्यं शोधनीयोमलाक्तः ।। १७०

यत्रापि कुर्वतो नात्मा जुगुप्सामेति पार्थिव ।।
तत्कर्तव्यमसंगेन यन्न गोप्यं महाजने ।। १७१

इति ते वै समुद्देशः कीर्तितः किंचिदेव च ।।
शेषः[3] स्मृतिपुराणेभ्यस्त्वया श्रोतव्य एव च ।। १७२

एवमाचरतो धर्मं महेशस्य[4] गृहे सतः ।।
धर्मार्थकाम संप्राप्ती परत्रेह च शोभनम् ।। १७३

एवं नानाविधान्धर्मान्महाकालस्य फाल्गुन ।।
वद तो ध्वनिराकाशे सुमहान्नभ्यजायत ।। १७४

यावत्पश्यंति ये तत्र समाजग्मुः[5] शृणुष्व तान् ।।
ब्रह्मा विष्णुः[6] स्वयं रुद्रो देवी रुद्रगणास्तथा ।। १७५

---

१ ब. हीम्योनै
२ ब. युजीत
३ अ. ब. शेषा
४ ब. माहेशस्य
५ ब. जगृमु
६ ब. विष्णु

इंद्रादयस्तथा देवा वसिष्ठाद्या मुनीश्वराः ।।
तुंबरुप्रवराश्चापि गंधर्वाप्सरसां गणाः ।। १७६

तान्महेशमुखान्सर्वान्महाकालो महामतिः ।।
अर्चयामास बहुधा भक्त्युद्रेकातिपूरितः ।। १७७

ततो ब्रह्मादिभिर्देवैर्वरे रत्नमयासने ।।
उपविष्टोऽभिषिक्तश्च महीसागरसंभवे ।। १७८

ततो देव्या समालिंग्य नीत्वोत्संगेस्वकं मुदा ।।
पुत्रत्वे कल्पितः[1] पार्थ महाकालो महामतिः ।। १७९

उक्तश्च यावद्ब्रह्माण्डमिदमास्ते शिवव्रत ।।
तावत्तिष्ठ शिवस्थाने शिवच्छिव भक्तितः ।। १८०

देवेन च वरोदत्तस्त्वल्लिंगं[2] योऽर्चयिष्यति ।।
जितेन्द्रियः शुचिर्भूत्वा ऊर्ध्वं मल्लोकमेष्यति ।। १८१

दर्शनं स्तवनं पूजा प्रणामश्च ततो जपः ।।
दानं चात्र कृतं लिंगे ममाति तृप्तिकारणम्[3]।। १८२

इत्युक्ते विस्मितादेवाः साधुसाध्विति ते जगुः ।।
ब्रह्म विष्णुमुखाश्चैव महाकालं[4] प्रतुष्टुवुः ।। १८३

ततः सुरैः स्तूयमानो वंद्यमानश्च चारणैः ।।
नृत्यद्भिरप्सरोभिश्च गीतैर्गंधर्वजैः शुभैः ।। १८४

---

१ ब. कल्पिता    २ ब. दत्तः
३ अ. कारणकम्    ४ ब. महाकाल

कोटिकोटिगणैश्चैव स्तुवद्भिः सर्वतोवृतः ।। १८५

महाकालो रुद्रभवनं गतो भवपुरस्सरः ।।
एवमेतन्महालिंगमुत्पन्नं कुरु नंदन ।। १८६

कूपश्चापि सरः पुण्यं महाकालस्य सिद्धिदम् ।।
अत्र ये मनुजाः[1] पार्थ लिंगस्याराधनेरताः ।। १८७

महाकालः[2] समालिंग्य ताच्छिवाय निवेदयेत् ।।
एतदत्यद्भुतं[3] लिंगं त्रिषु लोकेषु विश्रुतम् ।। १८८

दृष्टं स्पृष्टं पूजितं च गतास्ते भवसद्भतत् ।।
एवमेतानि लिंगानि सप्त जातानि फाल्गुन ।। १८९

ये शृण्वंति गुणंत्येतत्तेपि धन्या नरोत्तमाः ।। १९०

* ४ इति श्री स्कांदे...... श्री महाकाल माहात्म्ये महाकाल करंधम संवादे शिवपूजनविधि वर्णनं नामैकचत्वारिंशोऽध्यायः ।।

---

१ ब. मनुजा
२ अ. प्रतौ नास्ति ।
३ ब. एवं तदत्यद्भुतं
* ४ अ. इति श्री स्कंदपुराणे कुमारिकाखंडे श्री महाकाल माहात्म्यं ।।
ब. इति श्री स्कंदपुराणे कुमारिकाखंडे श्री महाकाल माहात्म्ये एकचत्वारिंशोऽध्यायः ।।

अध्याय :- ४२ chapter-42

[1]नारद उवाच ।।

ततोऽमया स्थापिते च स्थाने कालांतरेण ह ।।
चिंतितं तददये भूयो द्विजानुग्रहकाम्यया ।। १

वासुदेव विहीनं हि तीर्थमेतन्न रोचते[2] ।।
असूर्यं हि जगद्यद्वत्स हि भूषणऽभूषणम् ।। २

यत्र नैव हरिः स्वामी तीर्थे गेहेऽथ मानसे ।।
शास्त्रे वा तदज्ञत्सर्वं हांसं तीर्थं न वायसम् ।। ३

तस्मात्प्रसाद्य वरदं तीर्थेऽस्मिन्पुरुषोत्तमम् ।।
आनेष्ये कलया साक्षाद्विजानुग्रह काम्यया ।। ४

इति संचिंत्य कौरव्य ततोऽहं व चात्र संस्थितः ।।
ज्ञानयोगेन योगींद्रं शतं वर्षाण्य तोषयम् ।। ५

अष्टाक्षरं जपन्मंत्रं संनिगृह्येंद्रियाणि च ।।
वासुदेवमयो भूत्वा सर्वभूत कृपा परः[3] ।। ६

एवं मयाराध्यमानो गरुडं हरिरास्थितः ।।
गण कोटि परिवृतः प्रत्यक्षः समजायत ।। ७

---

१ अ. श्री नारद ।। ब. श्री नारद उवाच ।।
२ अ. प्रतौ नास्ति ।
३ ब. वरः

तम हं प्रांजलि र्भूत्वा दत्त्वार्घ्यं विधिवंद्वरैः ।।
प्रत्यवोचं प्रणम्याथ प्रबद्धकर संपुटः ।। ८

श्वेतद्वीपे पुरा द्रष्टं मया रूपं तव प्रभो ।।
अजं सनातनं विष्णो नरनारायणात्मकम् ।। ९

तद्रूपस्य कलामेकां स्थापयात्र जनार्दन ।।
यदि तुष्टोऽसि मे विष्णो तदिदं क्रियतां त्वया ।। १०

एवं मया प्रार्थितोऽथ प्रोवाच गरुडध्वजः ।।
एवमस्तु ब्रह्मपुत्र यत्त्वयाभीप्सितं त्वदद ।। ११

तत्तथा भविता सर्वमप्यत्रस्थं सदैव हि ।।
एवमुक्त्वा गते विष्णो निवेश्य स्वकलां[1] प्रभो ।। १२

मया संस्थापितो विष्णुर्लोकानु ग्रहकाम्यया ।।
यस्मात्त्स्वयं श्वेतद्वीपनिवास्यत्र हरिः[2] स्थितः[3] ।। १३

वृद्धो विश्वस्य विश्वास्यो वासुदेवस्ततः स्मृतः ।।
कार्तिके शुक्लपक्षे या भवत्येकादशी शुभा ।। १४

---

१ ब. फलां
२ ब. हरि
३ ब. स्थिताः

स्नानं कृत्वा विधानेन तौयप्रस्त्रवणादिषु[1] ।।
यौर्चयेदच्युतं भक्त्या पंचोपचारपूजया ।। १५

उपोष्य जागरं कुर्याद्गीतवाद्यं हरेः पुरः ।।
कथां वा वैष्णवीं कुर्याद् भक्रौध विवर्जितः ।। १६

दानं दद्यद्यथा शक्त्या नियतो त्द्रष्ट मानसः ।।
अनेक भव संभूतात्कल्पमषादखिलादपि ।। १७

मुच्यतेऽसौ न संदेहो यद्यपि ब्रह्मघातकः ।।
गारुडेन विमानेन वैकुंठं पदमाप्नुयात् ।। १८

कुलानां तारयेत्पार्थ शतमेकोत्तरं नरः ।।
श्रद्धायुक्तं मुदा युक्तं सोत्साहं सस्पृहं तथा ।। १९

अहंकारविहीनं च स्नानं धूपानुलेपनम् ।।
पुष्पनैवेद्य संयुक्तमर्ध दानसमन्वितम् ।। २०

यामे यामे महाभक्त्या कृतारार्तिक संयुतम् ।।
चामराह्लाद संयुक्तं भेरीनाद पुरस्कृतम् ।। २१

---

१ अ. 'श्र' पाठः ।

पुराणश्रुति संपन्नं भक्तियुक्त समन्वितम् ॥
विनिद्रं कृष्णास्वादस्पृहा ऽहर्नि च भारते ॥ २२

तत्पाद सौरभ प्राणसंयुतं विष्णु वल्लभम् ॥
संगीतं सार्चनकरं तत्कीर्तनमान्वितम् ॥ २३

पायुरोपेन[1] संयुक्तं पादोदक विभूषितम् ॥ २४

सत्यान्वितं सत्ययोग संयुतं पुण्यवार्तया ॥
पंचविंशतिभिर्युक्तं गुणैर्या जागरं नरः ॥
एकादश्यां प्रकुर्वीत [2]पुनर्न ऽजायते भुवि ॥ २५

अत्र तीर्थवरे पूर्वमैतरेय इति द्विजः ॥
सिद्धिं प्राप्तो महाभागो वासुदेव प्रसादतः ॥ २६

अर्जुन उवाच[3] ॥
ऐतरेयः कस्य पुत्रो निवासः क्वास्य वा मुने ॥
कथं सिद्धिमगाद्धीमान्वासुदेव प्रसादतः ॥ २७

[4]नारद उवाच ॥
अस्मिन्नेव मम स्थाने हारीतस्यान्वये ऽभवत् ॥ २८

---

१ अ. ब. 'वायुरोपेन' इतिस्यात्
२ 'पुनर्जायते' अ. ब. पाठः ।
३ ब. 'उवाच' नास्ति ।
४ अ. ब. श्री नारद ॥ इति स्यात् ।

मांडूकिरिति[१] विप्राग्र्यो वेदवेदांग पारगः ।। २९

तस्यासीदितरा नाम भार्या साध्वीगुणैर्युता ।।
तस्यामुत्पद्यत सुतस्त्वैतरेय इति स्मृतः ।। ३०

स च बाल्यात्प्रभुत्येव प्राग्जन्मन्यनुशिक्षितम् ।।
जजाप मंत्रं त्वनिशं द्वादशाक्षर संक्षितम् ।। ३१

न श्रृणोति[२] न वक्त्येव मनसापि च किंचन ।।
एवं प्रभावः सो/भूच्च बाल्ये विप्रसुतस्तदा ।। ३२

ततो मूको/यमित्येव नानोपायैः प्रबोधितः ।।
पित्रा यदा न कुरुते[३] व्यवहाराय मानसम् ।। ३३

ततो निश्चित्य मनसा जडोयमिति भारत ।।
अन्यां विवाहयामास दारान्पुत्रांस्तथादधे ।। ३४

पिंगानाम च सा भार्या तस्याः पुत्राश्च जज्ञिरे ।।
चत्वारः कर्म कुशला वेदवेदांग वादिनः ।। ३५

---

१ ब. मांडुकीरिति

२ ब. श्रितेन्य

३ अ. प्रती नास्ति ।

यज्ञेषु शांतिहोमेषु द्विजैः सर्वत्र पूजिताः[१] ।।
ऐतरेयोपि नित्यं च त्रिकालं हरिमंदिरे ।। ३६

जजाप परमं जाप्यं नान्यत्र कुरुते श्रमम् ।।
ततो माता निरीक्ष्यैव सपत्नी तनयांस्तथा ।। ३७

दार्यमाणेन मनसा तनयं वाक्यमब्रवीत् ।।
क्लेशायैव च जातो ऽसि धिग्मेजन्म च जीवितम् ।। ३८

नार्यास्तस्या नृलोकेऽत्र वरैवाजननिः स्फुटम् ।।
विमानिता या भर्त्रा स्यान्न पुत्रः स्याद्गुणैर्युतः ।। ३९

पिंगयं कृतपूण्या वै यस्याः[२] पुत्रा महागुणाः ।।
वेदवेदांगतत्त्वज्ञाः सर्वत्राभ्यर्चिता गुणैः ।। ४०

तदहं पुत्र दुर्भाग्या महीसागरसंगमे ।।
निमज्जिष्ये वरं मृत्युर्जीविते किं फलं मम् ।।
त्वमप्येवं महामौनी नन्द भक्तो हरेर्द्विजरम् ।। ४१

नारद उवाच ।।[३]
इति मातुर्वचः श्रुत्वा प्रहसन्नैतरेयकः ।। ४२

---

१ ब. ता

२ अ. तस्याः

३ अ. ब. प्रतिषु इत्ययं पाठः नास्ति ।

ध्यात्वा मुहूर्तं धर्मज्ञो मातरं प्रणतो ऽ ब्रवीत् ।।
मातर्मिथ्याभिभूतासि अज्ञाने ज्ञानवत्यसि ।। ४३

अशोच्ये शोचसि शुभे शोच्य नैवा ऽ पि शोचसि ।।
देहस्यास्य कृते मिथ्यासंसारे किं विमुह्यसि ।। ४४

मूर्खा चरितमेतद्धि मन्मातुरुचितं न हि ।।
अन्यत्संसारसारं च सारमन्यच्च मोहिताः ।। ४५

प्रपश्यंति यथा रात्रौ खद्योतं दीपवत्स्थितम् ।।
यदिदं मन्यसे सारं शृणु तस्याप्यसारताम् ।। ४६

एवं विधं हि मानुष्यमागर्भादिति कष्टदम् ।।
अस्थिपट्टतुलास्तम्भे स्नायुबन्धेन यंत्रिते ।। ४७

रक्तमांसमदालिप्ते विण्मूत्रद्रव्य भाजने ।।
केशरोमतृणाच्छन्ने सुवर्णत्वकसुधूतके ।। ४८

वदनैकमहाद्वारे [1]षड्गवाक्षविभूषिते ।।
[2]ओष्ठद्वयकपाटे च तथा दंतार्गलान्विते ।। ४९

---

१ ब. खंडवाक्ष....
२ ब. तुष्टद्वय......

नाडीस्वेदप्रवाहे च कालवक्रानलस्थिते ।।
एवंविधे गृहे गेही जीवो नामास्ति शोभने ।। ५०

गुणात्रयमयी भार्या प्रकृतिस्तस्य तत्र च ।।
बोधाहंकारकामाश्च क्रोध लोभादयोऽपि च ।। ५१

अपत्यान्यस्य हा कष्टमेवं मूढः प्रवर्तते ।।
तस्य योयो यथा मोहस्तथा तं शृणुतत्त्वतः ।। ५२

स्त्रोतांसि[१] यस्य सततं प्रस्त्रवंति गिरेरिव ।।
कफमूत्रादिकान्यस्य कृते देहस्य मुह्यति ।। ५३

सर्वाशुचि निधानस्य शरीरस्य न विद्यते ।।
शुचिरेकप्रदेशोऽपि विण्मूत्रस्य दतेरिव ।। ५४

स्पृष्ट्वा स्वदेहस्त्रोतांसि मृत्तोयैः शोध्यते करः ।।
तथाप्यशुचि भांडस्य न विरज्यति किं नरः[२] ।। ५५

कायः सुगन्ध तोयाद्यैर्यत्नेनापि सुसंस्कृतः ।।
न जहाति स्वकं भावं श्वपुच्छमिवनामितम् ।। ५६

---

१ अ. श्रोतांसि ब. श्रोतासि
२ ब. नैमः नराः

स्वदेहाशुचिगंधेन न विरज्यतियो नरः ।।
विरागे[1] कारणं[2] तस्य किमन्यदुपदिश्यते ।। ५७

गन्धले पापनोदार्थं शौचं देहस्य कीर्तितम् ।।
द्वयस्यापगमात्पश्चाद्भाव शुद्धया विशुध्यति ।। ५८

गंगातोयेन सर्वेणभृद्भारैः पर्वतोपमैः ।।
आ मृत्योराचरन्छैचं भावदुष्टो न शुध्यति ।। ५९

तीर्थस्नानैस्तपोभिर्वा दुष्टात्मा नैव शुध्यति ।।
श्वेदितः[3] क्षालितस्तीर्थे किं शुद्धिमधिगच्छति ।। ६०

अंत र्भावप्रदुष्टस्य विशतोऽपि हुताशनम् ।।
न स्वर्गो नापवर्गश्च देहनिर्दहनं परम् ।। ६१

भावशुद्धिः परं शौचं प्रमाणं सर्वकर्मसु ।।
अन्यथा लिंग्यते कांता भावेन दुहिताऽन्यथा ।। ६२

अन्यथैव स्तनं पुत्रश्चिंतयत्यन्यथा पतिः ।।
चित्तं विशोधयेत्तस्मात्किमन्यैर्बाह्य शोधनैः ।। ६३

---

१. अ. विराग ब. विराण
२ अ. करणं
३ अ. श्ववदितः

भावतः[१] संविशुद्धात्मा स्वर्ग मोक्षं च विंदति ।।
ज्ञानामलांभसा पुंसः सद्वैराग्य मृदा पुनः ।। ६४

अविद्याराग[२]विण्मूत्रलेप गंधविशोधनम् ।।
एवमेतच्छरीरं हि निसर्गाद शुचि विदुः ।। ६५

त्वंमात्रसारैनिः सारं कदलीसार संनिभम् ।।
ज्ञात्वैवं दोषवदेहं यः ~~प्रक~~ प्राज्ञः शिथिली भवेत् ।। ६६

स निष्क्रामति संसारे द्रढग्राही स तिष्ठति ।।
एवमेतन्महाकष्टं जन्म दुःखं प्रकीर्तितम् ।। ६७

पुंसामज्ञात दोषेण नानाकर्मवशेन च ।।
यथा गिरिवराक्रांतः कश्चिद्दुःखेन तिष्ठति ।। ६८

यथा[३] जरायुणा[४] देही दुःखं तिष्ठति वेष्टितः ।।
पतितः सागरे यद्वद्दुःखमास्ते समाकुलः ।। ६९

गर्भोदकेन सिक्तांगस्तथाऽऽस्ते व्याकुलः पुमान् ।।
लोहकुम्भे यथान्यस्तः पच्यते कश्चिदग्निना ।। ७०

---

१ ब. भवतः
२ अ. 'अविद्यारोग' ब. 'त्रिविद्याराग'
३ ब. तथा
४ ब. राजयुना

गर्भकुम्भे तथा क्षिप्तः पच्यते ~~कर्ठम्भूयनं~~ जठराग्निना ।।
सूचीभिरग्निवर्णाभिर्विभिन्नस्य निरन्तरम्[१] ।। ७१

यद्दुःखं जायते तस्य तद्गर्भेऽष्टगुणं भवेत् ।।
इत्येतद्गर्भदुःखं हि प्राणिनां परिकीर्तितम् ।। ७२

चरस्थिराणां सर्वेषामात्मगर्भानुरूपतः ।।
तत्रस्थस्य[२] च सर्वेषां जन्मनां स्मरणं भवेत् ।। ७३

*[३]मृतश्चाहं पुनर्जातो जातश्चाहं पुनर्मृतः ।।
नानायोनिसहस्राणि मया द्रष्टान्यनेकधा[४] ।। ७४

अधुनाजातमात्रोऽहं प्राप्त संस्कारएव च ।।
ततः श्रेयः करिष्यामि येन गर्भो न संभवेत् ।। ७५

अध्येष्यामि हरेर्ज्ञानं संसारविनिवर्तनम् ।।
एवं संचिंतयन्नास्ते मोक्षोपायं विचिन्तयन् ।। ७६

गर्भात्कोटिगुणं दुःखं जायमानस्य जायते ।।
गर्भवासे स्मृतिर्यासीत्सा ~~जन्म~~ जातस्य प्रणश्यति ।। ७७

---

१ अ. निरंतरं

२ ब. अत्रस्थस्य

*३ मृतश्चा...... मृतः ।। ब. प्रतौ इत्ययं पाठः नास्ति ।

४ 'दष्टानिजायता' अ. पाठः ।

स्पृष्टमात्रस्य बाह्येन वायुना मूढता भवेत् ।।
संमूढस्य स्मृतिभ्रंशः शीघ्रं संजायते पुनः ।। ७८

स्मृतिभ्रंशात्ततस्यस्य पूर्वकर्मवशेन च ।।
रतिः संजायते तूर्णं जंतोस्तत्रैव जन्मनि ।। ७९

रक्तो मूढश्च लोकोयमकार्ये संप्रवर्तते ।।
तत्रात्मानं न जानाति न परं न च दैवतम् ।। ८०

न श्रृणोति परं श्रेयः सति चक्षुपि नेक्षते ।।
समे पथि[1] समैर्गच्छन्स्खलतीव पदे पदे ।। ८१

सत्यां बुद्धौ न जानाति बोध्यमानो बुधैरपि ।।
संसारे क्लिश्यते तेन रागमोहवशानुगः ।। ८२

गर्भस्मृतेर भावेन शास्त्रमुक्तं महर्षिभिः ।।
तदुःख कथनार्थाय स्वर्गमोक्ष प्रसाधकम्[2] ।। ८३

ये शास्त्रज्ञाने सत्यस्मिन्सर्वकमार्थ साधके ।।
न कुर्वंत्यात्मनः श्रेयस्तदत्र परमुद्भुतम् ।। ८४

---

१ ब. पति
२ ब. कं

अव्यक्तेन्द्रियवृत्तित्वाद्बाल्ये दुःखं महत्पुनः ।।
इच्छन्नपि न शक्नोति वक्तुं कर्तुं च किंचन ।। ८५

दंतोत्थाने महद्दुःखं मौलेन व्याधिना तथा ।।
बालरोगैश्च विविधैः पीडा बालग्रहैरपि ।। ८६

तृड्[1]बुभुक्षापरीतांगः[2] क्वचित्तिष्ठति सरट्न् ।।
विण्मूत्रभक्षणाद्यं च मोहाद्बालः समाचरेत् ।। ८७

कौमारे कर्णवेधेन मातापित्रार्विताडनैः[3] ।।
अक्षराध्ययनाद्यैश्च दुःखं स्याद्गुरु शासनात् ।। ८८

प्रमत्तेंद्रिय वृत्तिश्च कामरागप्रपीडनात् ।।
रागोद्वृत्तस्य सततं कृतः सौख्यं हि यौवने ।। ८९

ईर्ष्यया सुमहद्दुःखं मोहाद्रक्तस्य जायते ।।
मत्तस्य कुपितस्यैव रागो दोषाय केवलम् ।। ९०

न रात्रौ विंदति[4] निद्रां[5] कामाग्नि परिखेदितः ।।
दवापि हि कृतः सौख्यमर्थोपार्जन चिंतया ।। ९१

---

१ 'तृट' अ. ब. पाठः ।
२ ब. परिगतः
३ अ. ताडने
४ ब. विदात
५ अ. निद्रा

नारीषु त्वनुभूतासु सर्वदोषाश्रयासु च ।।
विण्मूत्रोत्सर्गसदृशं सौख्यं मैथुननं स्मृतम् ।। ९२

सन्मानमपमा[1]निन वियोगेनेष्ट संगमः ।।
यौवनं जरया[2] ग्रस्तं क्व सौख्यमनुपद्रवम् ।। ९३

वलीपलितकायेन[3] शिथिलीकृत विग्रहः ।।
सर्व क्रियास्वशक्तश्च जरयाजर्ज्जरीकृतः ।। ९४

स्त्रीपुंसोर्यौवनं रूपं यदन्योन्याश्रयं पुरा ।।
तदेवं जरया ग्रस्तमुभयोरपि न प्रियम् ।। ९५

जराभि[4]भूतः पुरुषः पत्नीपुत्रादि बांधवैः ।।
अशक्तत्वादुराचारैर्भृत्यैश्च परिभूयते ।। ९६

धर्ममर्थं च कामं च मोक्षं च[5] नातुरो[6] यतः ।।
शक्तः साधयितुं तस्माद्युवा धर्मं समाचरेत् ।। ९७

वातपित्तकफादीनां वैषम्यं व्याधिरुच्यते ।।
वातादीनां समूहश्च देहो यं परिकीर्तितः ।। ९८

---

१ अ. नेन
२ ब. जया
३ अ. ब. 'कालेन' इति स्यात् ।
४ ब. जरोति
५ अ. 'न' पाठः ।
६ अ. तुरीयतः ।।

तस्माद्व्याधिमयं ज्ञेयं शरीरमिदमात्मनः ।।
रागैर्नाना विधैर्यांति देहे दुःखान्यनेकशः ।। ९९

तानि न स्वात्मवेद्यानि किमन्यत्कथयाम्यहम् ।।
एकोत्तरं मृत्युशतमस्मिन्देहे प्रतिष्ठितम् ।। १००

तत्रैकः[१] काल संयुक्तः शेषास्त्वागंतवः स्मृताः[२] ।।
ये त्विहागंतवः प्रोक्तास्ते प्रशाम्यन्ति भेषजैः ।। १०१

जप होम प्रदानैश्च कालमृत्युर्न शाम्यति ।।
विविधा व्याधयः शस्ताः सर्पाद्याः प्राणिनस्तथा ।। १०२

विषाणि चाभिचाराश्च मृत्योर्द्वाराणि देहिनाम् ।।
पीडितं सर्परोगाद्यैरपि धन्वंतरिः स्वयम् ।। १०३

स्वस्थीकर्तुं न शक्नोति कालप्राप्तं हि देहिनम् ।।
नौषधं न तपो मंत्रा न मित्राणि न बांधवाः[३] ।। १०४

शक्नुवंति परित्रातुं नरं कालेन पीडितम् ।।
रसायन तपो जप्यैर्योग सिद्धैर्महात्मभिः ।। १०५

---

१ ब. तत्रैक
२ ब. .... ता ।।
३ ब. .....वा ।।

कालमृत्युरपि प्राशैनीयते नापि संयुतैः ।।
नास्ति मृत्युसमं दुःखं नास्ति मृत्युसमं भयम्।। १०६

नास्ति मृत्युसमस्त्रासः सर्वेषामपि देहिनाम् ।।
सद्भार्या पुत्र मित्राणि राज्यैश्वर्य सुखानि च ।। १०७

आबद्धानि स्नेहपाशैर्मृत्युः सर्वाणि कृंतति ।।
किं न पश्यसि मातस्त्वं सहस्रस्यापि मध्यतः ।। १०८

जनाः शतायुषः पंचभयंति न भवन्ति वा[1] ।।
अशीतिका विपद्यन्ते केचित्सप्ततिका नराः ।। १०९

परमायुः स्थिता षोष्टिस्तदप्यस्ति न निष्ठतम्[2] ।।
तस्य यावद्भवे वायुर्देहिनः पूर्व कर्मभिः ।। ११०

तस्यार्धमायुषो रात्रिर्हस्ते मृत्युरूपिणी।।
बालभावेन मोहेन वार्धके जरया तथा ।। १११

वर्षाणां विंशतिर्याति धर्मकामार्थवर्जितः ।।
आगन्तुकैर्भवैः पुंसां व्याधिशोकैरनेकधा ।। ११२

---

१ ब. 'च' पाठः ।
२ अ. ~~निष्ट~~ तिष्टितं

हृत्रय तेद्धं हि तत्रापि यच्छेष तद्धि जीवितम् ।।
जीवितां ते च मरणं महाघोरमवाप्नुयात् ।। १११

जायते योनि कोटिषु मृतः कर्मवशात्पुनः ।।
देह भेदेन यः पुंसां वियोगः कर्म संख्यया ।। ११४

मरणं भवेन तद्विनिर्दिष्टं न[१] नाशः परमार्थतः ।।
महातमः प्रविष्टस्य च्छिद्यमानेषु मर्मसु ।। ११५

यदुःखं मरणं[२] जंतोर्न तस्ये हीपमा[३] क्वचित् ।।
हा तातमातर्हा कांते कंद्रत्येवं सुदुःखितः ।। ११६

मण्डूक इव सर्पेण गीर्यते मृत्युना जनः[४] ।।
बांधवैः संपरित्यक्तः प्रियैश्च परिवारितः ।। ११७

निः[५]श्वसन्दीर्घमुष्णं च मुखेन परिशुष्यता ।।
चतुरंतेषु खट्वायाः परिवर्तन्मुहुर्मुहुः ।। ११८

संमूढः क्षिपतेत्यर्थं हस्तपादा वितस्ततः ।।
खट्वातोवांछते भूमिं भूमेः खट्वां पुनर्महीम् ।। ११९

---

१ ब. ना
२ अ. ब. मरणे इतिस्यात् ।
३ अ. माः
४ ब. जयः
५ ब. नि

विवस्त्रो मुक्तलज्जश्च विष्ठानुलेपितः ॥
याचमानाश्च सलिलं शुष्क कण्ठोष्ठ तालुकः ॥ १२०

चिंतयानः स्ववित्तानि कस्यैतानि मृते मयि ॥
पंचावटान्खनमानः कालपाशेन कर्षितः ॥ १२१

म्रियते पश्यतामेव गले घुर्घुररावकृत् ॥
जीवस्तृणजलूकेव देहाद्देहं विशेत्क्रमात् ॥ १२२

संप्राप्योत्तरमंशेन देहं त्यजति पूर्वकम् ॥
मरणात्प्रार्थना दुःखमधिकं हि विवेकिनः ॥ १२३

क्षणिकं मरणे दुःखमनंतं प्रार्थना कृतम् ॥
ज्ञातं मयैतदधुना मृतो भवति यद्गुरुः ॥ १२४

न परः[१] प्रार्थयेद्भूयस्तृष्णा लाघवकारणम् ॥
आदौ दुःखं तथा मध्ये ह्यन्त्ये दुःख च दारुणम् ॥ १२५

निसर्गात्सर्व भूतानामिति दुःख परंपरा ॥
क्षुधा च सर्व रोगाणां व्याधिः[२] श्रेष्ठतमः स्मृतः ॥ १२६

---

१ अ. ब. 'परं'
२ ब. व्याधि

स चान्नौषाधिलेपेन क्षणमात्रं प्रशाम्यति ।।
क्षुद्व्याधि वेदना तीव्रा निःशेष बलकृन्तनी ।। १२७

तयाभिभूतो म्रियते यथान्यैत्यर्थाधि भिर्न्नरः ।।
राज्ञो ऽभिमानमात्रं हि ममैव विद्यते गृहे ।। १२८

सर्वमाभरणं भारं सर्वमालेपनं[1] मम[2] ।।
सर्वं प्रलापितं[3] गीतं नित्यमुन्मत्त चेष्टित ।। १२९

इत्येवं राज्य संभोगैः कुतः सौख्यं विचारतः[4] ।।
नृपाणां व्यग्रचित्तानामन्योन्यविजिगीषया ।। १३०

प्रायेण श्रीमदालेपान दुष्टाद्या महानृपाः ।।
स्वर्गं प्राप्यापि पतिताः कः श्रियो विंदते सुखम् ।। १३१

उपर्युपरि देवानामन्योन्यातिशये स्थितम् ।।
नरैः पुण्यफलं स्वर्गे मूलच्छेदेन भुज्यते ।। १३२

न चान्यत्क्रियते कर्म सो ऽत्र दोषः सुदारुणः ।।
छिन्नमूलतरुर्यद्वदवशः पतते क्षितौ ।। १३३

---

१ ब. वर्न

२ ब. बलं

३ ब. प्रलापित

४ ब. विचारितः

पुण्यमूलक्षये तद्वत्पातयंति दिवौकसः ।।
इति स्वर्गेपि देवानां प्रसिद्धं किं च वर्ण्यते ।। १३४

तथा नारकिणां दुःखं नास्ति सौख्यं विचारतैः ।।
स्थावरेष्वपि दुःखानि द्रावाग्निहिमशोषणम् ।। १३५

कुठारैश्छेदनं तीव्रं वल्कलानां च तक्षणम् ।।
पर्णशाखा[1]फलानां च पातनं चंडवायुना ।। १३६

अपमर्दश्च सततं गजैर्वन्यैश्च[2] देहिभिः ।।
तृड्बुभुक्षे च सर्पाणां क्रोधो दुःखं च दारुणम् ।। १३७

दुष्टानां घातनं लोके[3] पाशेन च निबन्धनम् ।।
एवं सरीसृपाणां च दुःखं मातर्मुहुर्मुहुः ।। १३८

अकस्माज्जन्ममरणं कीटादीनां तथाविधम् ।।
वर्षा शीतातपैर्दुःखं सुकष्टं मृगपक्षिणाम् ।। १३९

क्षुत्तृट्क्लेशन महता संत्रस्ताश्च सदा मृगाः ।।
पशुनागनिकायानां[4] शृणु दुःखानि यानि च ।। १४०

---

१ अ. शाखा
२ अ. ब. 'गजवन्यैश्च' इति स्यात् ।
३ ब. लोक
४ अ. ....नां

क्षुत्तृट्शीतादि दमनं वधबन्धन ताडनम् ।।
नासाप्रवेधनं त्रासः प्रतोदांकुश ताडनम् ।। १४१

वेणुकुन्तादि निगडमुद्गुरां/कुश ताडनम् ।।
भारोद्वहन संक्लेशं शिक्षायुद्धादि पीडनम् ।। १४२

आत्मयूथ वियोगश्च वने च नयनादिकम् ।।
दुर्भिक्षं दुर्भगत्वं च मूर्खत्वं च दरिद्रता ।। १४३

अधरोत्तरभावश्च मरणं राष्ट्रविभ्रमः ।।
अन्योन्याभिवादुःख मन्योन्याति शयात्पुनः ।। १४४

अनित्यता प्रभावाणामुच्छ्रयाणां च पातनम् ।।
इत्येवमादिभिर्दुःखैर्यस्माव्याप्तं चराचरम् ।। १४५

निरयादिमनुष्यां तं तस्मात्सर्वं त्यैवद्बुधः ।।
स्कन्धात्स्कन्धं नयेद्भारं[१] विश्रामं मन्यतेन्यथा ।। १४६

तद्वात्सर्वमिदं लोके दुःखं दुःखेन शाम्यति ।।
एवमेतज्जगत्सर्वमन्योन्याति शयोच्छ्रितम् ।। १४७

---

१ 'नयन भारं' अ. ब. पाठः ।

दुःखैराकुलितं ज्ञात्वा निर्वेदं परमाप्नुयात् ।।
निर्वेदाच्च विरागः स्याद्विरागाज्ज्ञान संभवः[1] ।। १४८

ज्ञानेन तं परं ज्ञात्वा विष्णुं मुक्तिमवाप्नुयात् ।।
नाहमेतादशे लोके रमेयं जननि क्वचित् ।। १४९

राजहंसो यथा शुद्धः काकामेध्य प्रदर्शकः[2] ।।
शृणु मातर्यत्र संस्थो रमेयं निरुपद्रवः ।। १५०

अविद्यायनमत्युग्रं नाना कर्माति शाखिनम् ।।
संकल्पदंशमकरं शोकहर्षं हिमातपम् ।। १५१

मोहांधकार तिमिरं लोभव्याल सरीसृपम् ।।
विषयानन्यथाध्वानं कामक्रोध विमोक्षकम् ।। १५२

तदतीत्य महादुर्गं[3] प्रविष्टोऽस्मि महद्वनम् ।।
न तत्प्रश्यि शोचंति न प्रदुष्यंति तद्विदः ।। १५३

न च बिभ्यति कोषांचिन्नास्य बिभ्यति के चन ।। १५४

---

१ ब. व
२ अ. प्रदेशके
३ ब. दुर्गे

तस्मिन्वने सप्त महाद्रुमास्तु सप्तैव नद्यश्च फलानि सप्त ।।
सप्ताश्रमाः सप्त समाधयश्च दीक्षाश्च सप्तैतदरण्य रूपम् ।। १५५

पंचवर्णानि दिव्यानि चतुर्वर्णानि कानिचित् ।।
त्रिद्विवर्णै कवर्णानि पुष्पाणि च[१] फलानि च ।। १५६

सृजंतः पादपास्तत्र व्याप्य तिष्ठन्ति तद्वनम् ।। १५७

ऊर्ध्वं रसानाददते प्रजाभ्यः सर्वाश्च तास्तत्त्वतः कोपि वेद ।। १५८

सप्तैव गिरयश्चात्र धृतं त्रिर्भुवन त्रयम् ।।
नद्यश्च सरितः सप्त ब्रह्मवारिवहाः सदा ।। १५९

तेजश्चाभयदानत्वमद्रोहः कौशलं तथा ।।
अचापल्पमथा क्रोधः प्रियवादश्च सप्तमः ।। १६०

इत्येते गिरयो ज्ञेयास्तस्मिन्द्विावने स्थिताः ।।
द्रढनिश्चयस्तथा भासासमता निग्रहो[२] गुणाः[३] ।। १६१

---

१ ब. प्रतौ नास्ति ।
२ अ. ब. 'निग्रहं' इतिस्यात् ।
३ ब. गुणाः

निर्ममत्वं तपश्चात्र सन्तोषः सप्तमो ह्रदः ।।
भगवद् गुण विज्ञानाद्भक्तिः स्यात्प्रथमा नदी ।। १६२

पुष्पादिपूजा द्वितीया तृतीया च प्रदक्षिणा ।।
चतुर्थी स्तुतिवाग्रूपा पंचमी ईश्वरार्पणा[1] ।। १६३

षष्ठी ब्रह्मैकता प्रोक्ता सप्तमी सिद्धिरेव च ।।
सप्त नद्योऽत्र कथिता ब्रह्मणा परमेष्ठिना ।। १६४

ब्रह्मा धर्मो यमश्चाग्निरिंद्रो वरुण एव च ।। १६५

धनदश्च ध्रुवादीनां सप्तकानर्चयंत्यमी ।।
नदीनां संगमस्तत्र वैकुंठसमुपह्वरे ।। १६६

आत्म तृप्ता यतो यांति शांता दांताः परात्परम् ।।
केचिद्द्रुमाः स्त्रियः केचित्केचितत्त्वविदोऽपरे ।। १६७

सरितः केचिदाहुः स्म सप्तैव ज्ञानवित्तमाः[2] ।।
अनपेत[3] व्रत कामोऽत्र ब्रह्मचर्यं चरामि च ।। १६८

---

१ ब. .....र्पणाः
२ ब. विश्रमाः
३ अ. अपेतव्रत ब. अपेतवृत

ब्रह्मैव समिधस्तत्र ब्रह्माग्निर्ब्रह्म संस्तरः ।।
आपोब्रह्म गुरुर्ब्रह्म ब्रह्मचर्यमिदं मम ।। १६९

एतदेवेदर्शं सूक्ष्मं ब्रह्मचर्यं विदुर्बुधाः ।।
गुरुं च श्रृणु मे मातर्यो मे विद्याप्रदो/भवत् ।। १७०

एकः शास्ता न द्वितीयो/स्ति शास्ता त्दद्येवतिष्टन्पुरुषं
[1]प्रशास्ति ।।
तेनाभियुक्तः प्रणवादिवोदकं यथा नियुक्तोस्मि[2] तथा
चरामि ।। १७१
एको गुरुर्नास्ति तथा द्वितीयोत्ददि स्थितस्तमहंनुब्रवीमि ।।
यं चावमान्येव गुरुं मुकुन्दं पराभूता दानवाः सर्वएव ।। १७२

एको बंधुर्नास्ति[3] ततो द्वितीयो त्ददि स्थितस्थहंनुब्रवीमि ।।
तेनानु शिष्य बांधवा बंधुमंतः सप्तर्षयः सप्तदिवि प्रभांति ।। १७३

ब्रह्मचर्यं स संसेव्यं गार्हस्थ्य श्रृणु यादशम् ।।
पत्नी प्रकृतिरूपा मे तच्चित्तोनास्मिकर्हचित् ।। १७४

मच्चिता सा सदा मातर्मम सर्वार्थसाधनी ।।
घ्राणं जिह्वा च चक्षुश्च त्वक च श्रोत्रं च पंचमम् ।। १७५

गंधो रसश्च रूपं च शब्दः स्पर्शश्च पंचमम् ।। १७६

---

१ अ. शास्ति शास्ता ।। ह इत्ययं अधिकम्
२ ब. प्रतौ 'स्मि' नास्ति ।
३ वधंनास्ति

मंतव्यमथ बोधव्यं सप्तैताः समिधो मम् ।।
हु त[1] नारायण[2] ध्यानादभुक्ते नारायणः स्वयम् ।। १७७

एवं विधेन यज्ञेन यजाम्यस्मि तमीश्वरम् ।।
अकामयानस्य च सर्वकामोभवेद्विषाणस्य सर्वदोषः ।। १७८

न मे स्वभावेषु भवंति लेपास्तोयस्य बिंदोरिव पुष्करेषु ।।
नित्यस्य मे नैव भवंत्य नित्या निरीक्षमणास्य बहुस्वभावात् ।। १७९

न सज्जते कर्मसु भोगजालं दिवीय सूर्यस्य मयुख[3] जालम् ।। १८०

एवंविधेन पुत्रेण मा मातुर्दुःखिनी भव ।।
तत्पदं त्वां च नेष्यामि न यत्क्रतुशतैरपि ।। १८१

इति पुत्रवचः श्रुत्वा विस्मिता इतराभवत् ।।
चिंतयामास यद्येवं विद्वान्मम सुतो द्रढम् ।। १८२

लोकेषु ख्यातिमायाति ततो मे स्याद्यशः परम् ।।
इत्यादि चिंतयंत्यां च रजन्यां भगवान्हरिः[4] ।। १८३

---

१ अ. ब. 'हुता'
२ अ. णा
३ अ. ब. मयूष
४ अ. भगवान् हरिः

प्रत्द्रष्टस्तस्य तैर्वाक्यैर्विस्मितः प्रादुरास च ।।
मूर्तैः स्वयं विनिष्क्रम्य शंखचक्रगदाधरः ।। १८४

जगदुद्भासयन्भासा सूर्यकोटि समप्रभः ।।
ततो निष्पत्य धरणीं[1] त्द्रष्टरोमाश्रुद्गदः ।। १८५

मूर्ध्नि बद्धांजलिं धीमानैतरेयोऽथ तुष्टुवे ।। १८६

नमस्तुभ्यं भगवते वासुदेवाय धीमहि ।।
प्रद्युम्नायनिरुद्धाय नमः संकर्षणाय[2] च ।। १८७

नमो विज्ञानमात्राय परमानंद मूर्तये ।।
आत्मारामाय शांताय निवृत्तद्वैत द्रष्टये ।। १८८

आत्मानंदानुभूत्यैव सम्यक्तयक्तोर्मये नमः ।।
त्दृषिकेशाय महते नमस्तेऽनंत शक्तये ।। १८९

---

१ ब. धरणी

२ अ. संकर्णाय

वचस्युपरते प्राप्यो य एको मनसा सह ।।
अनामरुप चिन्मात्रः सोऽव्यान्नः सदसत्परः ।। १९०

यस्मिन्निदं यतश्चेदं तिष्ठत्यपैति जायते ।।
[1]मृन्मयेष्विव मृज्जातिस्तस्मै ते ब्रह्मणे नमः ।। १९१

यं[2] न स्पृशंति न विदुर्मनोबुद्धिं द्रियासवः ।।
अंतर्बहिश्च विततं व्योमवत्प्रणतोऽस्म्यहम् ।। १९२

देहेंद्रिय प्राणमनोधियोऽमी यदंश बद्धाः कर्मसु ।।
नैवान्य[3]दालोहमिव प्रतप्तं स्थानेषु तदृष्ट पदेन एते ।। १९३

चतुर्भिश्च त्रिभिर्द्वाभ्यामेकधा प्रणमामि तम[4] ।।
पूर्वापरापरयुगे शास्तारं परमीश्वरम् ।। १९४

हित्वा गतीर्मोक्षकामा यं भजंति दशात्मकम् ।।
तं परं सत्यममलं त्वां वयं पर्युपास्महे ।। १९५

ॐ नमो भगवते महापुरुषाय महानुभावाय विभूतिपते[5] ।।
ये सकलसात्वत परिवृढनिष्कर करकमलोत्पल परमपरमेश्वरम् ।। १९६

---

१ ब. मन्मये
२ ब. ये
३ अ. 'नैवान्य' नास्ति ।
४ ब. तां
५ ब. 'विभूपतये'

त्वाग्निरास्यं वसुधाङ्घ्रियुग्मं नभःशिरश्चंद्र रवी च नेत्रे ।।
समस्तलोका जठरं भुजाश्च दिशश्चतस्त्रो भगवन्नमस्ते ।। १९७

जन्मानि तावंति न संति देव निष्पीडय सर्वाणि च सर्वकालम् ।।
भूतानि[1] यावंति मयात्र[2] भीमे पीतानि संसार महासमुद्रे ।। १९८

संपच्छिलानां हिमवन्महेंद्र कैलासमेर्वादिषु नैव तादृक् ।।
देहानने काननु गृहण तो मे प्राप्तास्ति संपन्महतीयथेश ।। १९९

न संति ते देव भुवि प्रदेशा न येषु जातोऽस्मि तथा विनिष्टः ।।
भूत्वा मया येषु न जंतवश्च संभक्षितोवा न भूतसंघैः ।। २००

शोकाभि[3] भूतस्य ममाश्रु देव यावत्प्रमाणं पतितं भवेषु ।।
तावत्प्रमाणं न जलं पयोदार्मुचंति दिव्यैरपि वर्षलक्षैः ।। २०१

मन्ये धरित्री परमाणु संख्यामुपैति पित्रोर्गणना न मह्यम् ।।
मित्राण्यनुगीव्य बंधून्संख्यातुमीशोऽस्मि न देवदेव ।। २०२

त्वय्यर्पितं नाथ पुनः पुनर्मे मनः समाक्षिप्य सुदुर्द्धरारि ।।
कामो वशं क्रोध मुखैः सहायैः करोति किं तद्भगवन् करोमि ।। २०३

---

१ अ. भूतानि
२ ब. मयात
३ ब. शौकाभि

सो हं भृशार्तः करुणाकरस्त्वं संसारगर्ते पतितस्य विष्णो ।।
महात्मनां संश्रयमभ्युपेतो नैवावसीदत्यपि दुर्गतोऽपि ।। २०४

परायणं रोगवतो[१] हि वैद्यो महाब्धिमग्नस्य च नौर्नरस्य ।।
बालस्य मातापितरौ सुघोरसंसारखिन्नस्य हरेत्वमेव ।। २०५

प्रसीद सर्वेश्वर सर्वभूत सर्वस्य हे तो[२] परमार्थसार ।।
मामुद्धरास्मादुरुदुःख[३]संघात्संसारगर्तात्त्व परिग्रहेण ।। २०६

कामाग्निनच्युत रुषा च सुदुर्भरेण संपश्यतो मम उरुक्रम सीदतो हि ।। २०७

भवतुं भद्राणि समस्तदोषाः प्रयांतुतुनाशं जगतोऽखिलस्य ।।
मयाद्य भक्त्या परमेश्वरे प्रभौ स्तुते जगद्धातरि वासुदेवे ।। २०८

ये भूतले ये दिवि चांतरिक्षे रसातले प्राणिगणाश्च केचित् ।।
भवंतु ते सिद्धियुजो मयाद्य स्तुते जगद्धातरि वासुदेवे ।। २०९

अज्ञानिनो ज्ञानविदो भवंतु प्रशान्तिभाजः सततोग्रचिताः ।।
मया च विश्वंभरेणो ह्यनंते स्तुते जगद्धातरि वासुदेवे ।। २१०

---

१ अ. ब. 'रोगवतां'
२ ब. हेतोः
३ 'संघात्..... ग्रहेण'।। इदमर्धं अ. पुस्तके लुप्तम्

शृण्वंति ये मे स्तुवतस्तथान्ये पश्यंति ये मामिदमीरयंतम् ।।
देवासुराद्या मनुजास्तिरश्चो भवंतु ते ऽप्यच्युतयोगभाजः ।। २११

ये चापि मूका विकलेंद्रियत्वात्पठंति नो नैव विलोकयंति ।।
पश्वादयः कीटपिपीलिकाद्या भवंतु ते ऽप्यच्युतयोगभाजः ।। २१२

नश्यंतु[1] दुःखानि जगत्यपेतु लोभादिको दोषगणः प्रजाभ्यः ।।
यथात्मनि भ्रातरि चात्मजे वा तथा नरस्यास्तु जनेऽपिभावः ।। २१३

संसारवैद्येऽखिलदोषहानि विचक्षणे निर्वृतिहेतुभूते ।।
संसारबंधाः शिथिलो भवंतु त्वदि स्थिते सर्वजनस्य विष्णो ।। २१४

पापं प्रणाशं मम च प्रयातु यन्मानसं यच्च करोमि वाच ।।
शारीरमप्या चरितं च यन्मे स्मृते जगद्धातरि वासुदेवे ।। २१५

यथा हि वा वासुदेवेति प्रोक्ते ।।
सकीर्तने विष्णुभक्तस्य वापि ।।
स्मृते हरौ वापि[2] प्रयाति पापं ।।
सत्येन मे नश्यतां[3] तेन पापं ।। २१६

इत्थं कृपां कुरु मयि प्रणतेऽखिलेश त्वां ।।
स्तोतुमंबुजभवोऽपि हि देव नेशः ।। २१७

---

१ अ. नश्यति ब. नश्यंति

२ ब. चापि

३ ब. नश्यते

स त्वं प्रसीद भगवन्कुरु मय्यनाथे ++
विष्णो कृपां परमकारुणिकः किलत्वम् ।।
संसारसागर निमग्नमनंत दीन
मुद्धर्तुमर्हसि हरे पुरुषोत्तमोसि ।। २१८

इत्थं स्तुतः स भगवानै तरेयेण भारत ।।
वासुदेवो विशालात्मा ज्ञानंद मिदमाह तम् ।। २१९

वत्सै तरेय तुष्टोस्मि भक्तयानेन स्तवेन ते ।।
वरं वृणुष्व मत्तस्त्वं दुर्लभं यदभीप्सितम् ।। २२०

ऐतरेय उवाच ।।[1]
एष एव वरो नाथ मम नित्यम भीप्सितः ।।
मज्जतो घोरसंसारे कर्णधारो हरे भव ।। २२१

श्री भगवानुवाच ।।
मुक्त एवासि संसाराद्यस्य ते भक्तिरी दशी ।।
ग्रहैर्महाग्रहैर्बद्धो नैव ते द्वित्रयोदशी ।। २२२

यश्चैव स्तोत्रेण सततं गुप्तश्चात्र समीहितम् ।।
स्तोष्यते वासुदेवं मां स पापक्षयमाप्स्यति ।। २२३

यस्मादेतेन स्तोत्रेण पापं नाशमवाप्स्यति ।।
अधनाश नमित्येव तस्माख्यातिम वाप्स्यति ।। २२४

---

१ अ. ऐतेरैय ।।। ब. एतरेय उ० ।।

एकादशयामुपोष्यैव ममाग्रे यः पठिष्यति ।।
स्तवमेनं स पूतात्मा मम लोकमवाप्स्यति ।। २२५

सर्वेषामेव क्षेत्राणां गुप्तक्षेत्रं प्रियं यथा ।।
तथा सर्वस्तवानां च स्तवोयं[१] सुप्रियो मम ।। २२६

यानि चोद्दिश्य भूतानि जप्यते/सौ महात्मभिः ।।
तानि शांति भंगं प्रज्ञां प्राप्स्यंति कृपया मम ।। २२७

त्वं च वत्स श्रौत धर्मान्सम्यगाचर श्रद्धया[२] ।।
न तैर्बंधं मयि न्यस्तैराप्स्य नभि संधितैः ।। २२८

यज * यज्ञैरवाप्यैव दारान्नदय मातरम् ।।
मयि ध्यानेन तीव्रेण मामवाप्स्यस्य संज्ञयम् ।। २२९

बुद्धिर्मनोथ भूतानि बुद्धिकर्मेन्द्रियाणि च ।।
त्रयोदशग्रहैर्वै स्युस्त्रयोदश महाग्रहाः ।। २३०

बोद्धव्यमथ मंतव्यमहता शब्द एव च ।।
स्पर्शौ रसौ रूपगन्धौ वचनादानमेव च ।। २३१

---

१ ब. स्तवैष

२ अ. प्रतौ नास्ति ।

वित्दत्युत्सर्ग आनंदस्त्रयोदश महाग्रहाः ।।
एतान्महाग्रहान्पुत्र शुद्धान्छुद्धैः स्वकैर्ग्रहैः ।। २३२

*गृहाण ध्यानयोगेन ममैवं मोक्षमाप्स्यसि ।।
एवं त्वं कर्मभिर्वीद्ध नैष्कर्म्यं समवाप्स्यसि ।। २३३

शुल्बं रसेन संविद्धं दक्षो हेम यथास्नुते ।।
वर्णाश्रमाचारवता मयि संन्यस्त कर्मणा[१] ।। २३४

मदनुध्यानयुक्तेन मोक्षो नास्तीह दुर्लभः ।।
तस्मादेवं वर्तमानो ऽनन्द व्रतपरायणः ।। २३५

उद्धृत्य सप्तपुरुषाल्लोयं मयि गमिष्यसि ।।
सांप्रतं प्रतिभास्यंति वेदश्रुत्या[२] पठिता अपि[२] ।। २३६

ततस्त्वं कोटितीर्थे च यज्ञे वै हरिमेधसः ।।
याहि तत्र भविष्यं ते सर्वं मातुरभीप्सितम् ।। २३७

इत्युक्त्वा भगवान्विष्णु मूर्ति मध्ये विवेश ह[३] ।।
विलोक्य मानो निमिषं मात्रा चैव सुतेन च ।। २३८

---

१ ब. कर्मणां
२ ब. 'पिते' इतिस्यात् ।
३ ब. है ।।

ततो मूर्तिं नमस्कृत्य वासुदेवस्य विस्मितः ।।
ऐतरेयः स्वजननीं मुदितो वाक्यम ब्रवीत् ।। २३९

पुरा हम भवं शूद्रो भीतः संसार दोषतः ।।
परिनिष्ठागतं धर्म ब्राह्मणं शरणं गतः ।। २४०

स कृपालुर्मम प्राह मंत्रं वै द्वादशाक्षरम् ।।
सदेमं जपचेत्युक्त्वा तमहं च जप्तवा सदा ।। २४१

तेन जाप्यप्रभावेन ममोत्पत्तिस्त वोदरात् ।।
जातस्मृतिर्विष्णु भक्तिः स्थितिस्त्र च सर्वदा ।। २४२

इदानीं च प्रयाम्येष यज्ञं तं हरिमेघसः ।।
त्वद्रूपं विष्णुप्रीत्यर्थं प्रणम्य त्वां प्रसादये ।। २४३

ततो महीनगरकाख्ये कोटितीर्थतलस्थितम् ।।
यजन्तं संवृतं विप्रैः कोटितीर्थशस्तमुपागमत् ।। २०४

गेहाय मातरं प्रोच्यं स यज्ञे प्रोक्त्वान्द्विजः ।।
नमस्तस्मै भगवते विष्णवे/कुण्ठमेघसे ।। २४५

---

१ अ. गमन्

२ अ. कंठ

651

यन्मायामोहितधियो भ्रमामः कर्मसागरे ।।
इति श्लोकं महार्थं ते हरिमेघ मुखा[1] द्विजाः ।। २४६

आकर्ण्य सनपूजाद्यैः [2]पूजयामासुरंग तम् ।।
ततो वेदार्थैर्न पुण्यैस्तेन ते तोषिता द्विजाः ।। २४७

प्रददुर्दक्षिणां सर्वां हरिमेधाः सुतामपि ।।
द्रव्यं कन्यां च संगृह्य स्वगृहं समुपागमत् ।। २४८

वंदयित्वा स्वजननीं पुत्रानुत्पाद्य चामलान् ।।
दृष्ट्वा यज्ञैरैतरेयै। ~~॥~~ द्वादशीव्रत तत्परः ।। २४९

वासुदेवानुध्यानेन मोक्षं पश्चादु(श्वा)पागतः ।।
एवंविधो वासुदेवः स्वयमत्रास्ति भारत[3] ।। २५०

योर्चयेत्पूजयेत्स्तौति ~~फलं पूर्वं मया तव~~ ।।
सर्वं तस्याक्षयं विदः ।।
शिवधर्मेषु यत्प्रोक्तं फलं पूर्वं मया तव ।। २५१

तादृशं लभते मर्त्यो वासुदेवप्रसादतः ।। २५२

[4] इति श्री स्कांदे..... श्री वृद्ध वासुदेव माहात्म्य वर्णनं ऐतरेय-ब्राह्मण चरित्र वर्णनं नाम द्विचत्वारिंशो/ध्यायः ।।

---

१ ब. सुखा

२ अ. 'पूजयामासुरं गतः'।। इति स्यात् ।

३ ब. भारते

४ अ. इति श्री स्कंद पुराणे कुमारिकाखंडे वृद्ध वासुदेव माहात्म्यं ।।
ब. इति श्री स्कंद पुराणे कुमारिकाखंडे श्री वृद्ध वासुदेव माहात्म्ये द्विचत्वारिंशोध्यायः ।।